# २६. श्रीकृष्णाष्टकं - पालयाच्युत

पालयाच्युत पालयाजित पालय कमलालय ।
लीलया धृतभूधरांबुरुहोदर स्वजनोदर ॥

मध्वमानसपद्मभानुसमं स्मरप्रतिमं स्मर
स्निग्धनिर्मलशीतकांतिलसन्मुखं करुणोन्मुखं ।
हृद्यकंबुसमानकंधरमक्षयं दुरितक्षयं
स्निग्धसंस्तुत रूप्यपीठकृतालयं हरिमालयं ॥ १ ॥

अंगदादिसुशोभिपाणियुगेन संक्षुभितैनसं
तुंगमाल्यमणींद्रहारसरोरसं खलनीरसं ।
मंगलप्रदमंथदामविराजितं भजताजितं
तं गृणे वररूप्यपीठकृतालयं हरिमालयं ॥ २ ॥

पीनरम्यतनूदरं भज हे मनः शुभ हे मनः
स्वानुभावनिदर्शनाय दिशंतमर्थ्यसुशंतमं ।
आनतोस्मि निजार्जुनप्रियसाधकं खलबाधकं
हीनतोज्झित रूप्यपीठकृतालयं हरिमालयं ॥ ३ ॥

हैमकिंकिणिमालिकारशनांचितं तमवंचितम्
रत्नकांचनवस्त्रचित्रकटिं घनप्रभया घनं ।
कम्रनागकरोपमोरुमनामयं शुभधीमयं
नौम्यहं वररूप्यपीठकृतालयं हरिमालयं ॥ ४ ॥

वृत्तजानुमनोज्ञजंघममोहदं परमोहदं
रत्नकल्पनखत्विषा हृतहृत्तमस्ततिमुत्तमं ।
प्रत्यहं रचितार्चनं रमया स्वया गतयास्वयं
चित्त चिंतय रूप्यपीठकृतालयं हरिमालयं ॥ ५ ॥

चारुपादसरोजयुग्मरुचामरोच्चयचामरो-
दारमूर्धजभारमंडलरंजकं कलिभंजकं ।
वीरतोचितभूषणं वरनूपुरं स्वतनूपुरं
धारयात्मनिरूप्यपीठकृतालयं हरिमालयं ॥ ६ ॥

शुष्कवादिमनोतिदूरतरागममोत्सवदागमं
सत्कवींद्रवचोविलासमहोदयं महितोदयं ।
लक्षयामि यतीश्वरैः कृतपूजनं गुणभाजनं
धिक्कृतोपमरूप्यपीठकृतालयं हरिमालयं ॥ ७ ॥

नारदप्रियमाविशांबुरुहेक्षणं निजरक्षणं
तारकोपमचारुदीपरुचांतरे गतचिंतरे ।
धीरमानसपूर्णचंद्रसमानमच्युतमानम
द्वारकोपमरूप्यपीठकृतालयं हरिमालयं ॥ ८ ॥

रूप्यपीठकृतालयस्यहरेः प्रियं दुरिताप्रियं
तत्पदार्चकवादिराजयतीरितं गुणपूरितं ।
गोप्यमष्टकमेतदुच्चमुदे ममास्त्विह निर्ममः
प्राप्यशुद्धफलाय तत्र सुकोमलं हृतधीमलं ॥९ ॥

॥ इति श्रीमद्वादिराजपूज्यचरणविरचितं श्रीकृष्णाष्टकस्तोत्रं संपूर्णम् ॥

॥ श्रीकृष्णार्पणमस्तु ॥